National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(53): 225-227
© 2024 NJHSR
www.sanskritarticle.com

डॉ. लालसिंहपठानिया
प्राचार्यः (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

Correspondence:
डॉ. लालसिंहपठानिया
प्राचार्यः (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

# दयानन्दमते चेतनतत्त्वम्

डॉ. लालसिंहपठानिया

आर्यदयानन्दस्य दर्शनशास्त्रेऽत्यधिकारुरासीदिति सङ्केतः पाखण्डखण्डनपञ्चमहायजनाविधिग्रन्थ-योराप्यते। ऋग्वेदभाष्यभूमिकायामपि चेतनतत्त्वस्य सत्तां स्वीकुर्वन् स्वामिनः आत्मतत्त्वविषये रहस्यं प्रतिपादयन्ति। दयानन्दमते अचेतनाच्चेतनस्याभिव्यक्तिरुत्पत्तिर्वा न सम्भवति अतः जडपदार्थाद्व्यति-रिक्तमस्ति किमपि चेतनं तत्त्वं तदेव आत्मा अस्ति । तस्य प्राप्तिरेव प्रायः भारतीयदर्शनेषु मोक्षः, विवेकज्ञानं, कैवल्यः वा भवति । स चेतनपदार्थः चेतनतत्त्वं वा आत्मा इति कथ्यते इति सर्वै भारतीयदर्शनैरङ्गीक्रियते । भारतीयदर्शने आत्मनो नैकानि नामानि प्राप्यन्ते यथा - जीवः, पुरुषः, ज्ञः, ज्ञाता, ज्ञानी, प्राणी, शरीरी, देही, जन्तु, पुमान्, चेतनश्च । साङ्ख्ययोगन्यायवैशेषिकमीमांसावेदान्त-जैनबौद्धचार्वाकादिषु दर्शनेषु आत्मनो यद्वर्णनं प्राप्यते तेन वर्णनेन सह दयानन्दस्य कुत्रचित् साम्यमस्ति कुत्रचिच्च वैषम्यमस्ति इति विवेचमत्र ।

न्यायदर्शने यल्लक्षणं जीवात्मनः प्रतिपादितं तस्यैव लक्षणस्याङ्गीकारो दयानन्दस्वामिनः कुर्वन्ति ।[1] तत्र न्यायदर्शने आत्मसामान्यवान् आत्मा । स च देहादिव्यतिरिक्तः प्रतिशरीरं भिन्नो नित्यो विभुश्च । स च मानस प्रत्यक्षः। बुद्ध्यादिगुणानामाश्रयो वक्तव्यः । स एव आत्मा ।[2] बुद्धिसुखदुःखेच्छाद्वेषप्रयत्न-धर्माधर्मसंस्कारादय आत्मनो विशेष गुणा सन्ति । आत्मा गुणी अस्ति । अतस्तेषां विशेषगुणामाश्रय-मात्मास्तीति । तस्य सामान्यगुणाः सुखादयो पञ्च बुद्ध्यादयो नव विशेषगुणाः।[3] दयानन्ददर्शना-नुसारमात्मा नित्यो विभुश्चास्ति। स च स्वतन्त्रकार्योपलम्भाद् विभुः । परममहत्परिमाणवानित्यर्थः। विभुत्वाचा नित्योऽसौ व्योमवत्।[4]

दयानन्दमते आत्मनो द्वैविध्यम् - दयानन्दमते आत्मा वस्तुतः द्विविधोऽस्ति जीवात्मा परमात्माश्चेति।[5] तत्रेश्वरः सर्वज्ञः परमात्मैक एव । जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च। अन्नम्भट्टकृतप्रकरणग्रन्थे तर्कसङ्ग्रहे कथितमस्ति आत्माविषये एवमेव उक्तं- ज्ञानाधिकरणमात्मा । स द्विविधः परमात्मा जीवात्मा च । तत्रेश्वरः सर्वज्ञः परमात्मैक एव । जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च ।[6] नित्यविषये वैशेषिकसूत्रे कथितमस्ति - सद् अकारणवत् नित्यम् दयानन्दमते आत्मा विद्यमानः अस्ति तस्य च आत्मनो उत्पत्तिकारमपि किमपि नास्ति तस्मात् आत्मा नित्यः, अविनाशी, सर्वगतः, स्वयम्भूश्चास्ति।[7]

**दयानन्दमते जीवस्यानेकत्वम् -** दयानन्दचिन्तनानुसारं जीवात्मनः अनेके सन्ति। जीवात्मा वस्तुतः ईश्वरात् पृथगस्ति । हि ईश्वरः सर्वज्ञः अन्तर्यामी अस्ति जीवश्चाल्पज्ञः विद्यते । दयानन्दस्य मतमिदं साङ्ख्यदर्शनस्य पुरुषबहुत्वेन सह साम्यं स्थापयति । साङ्ख्यदर्शने पुरुष एक एव नास्ति अनेके सन्ति । हि सर्वेषां पुरुषाणां जन्ममरणकरणां प्रवृत्तिरयुगपद्भवति । साङ्ख्यसूत्रे महर्षिकपिलेन एकस्मिन् सूत्रे

कथितम् - जन्मादिव्यवस्थातः पुरुषबहुत्वम् ।[8] अस्मिन्नेवक्रमे श्रीमदीश्वरकृष्णविरचितसाङ्ख्य-कारिकायामपि कथितमस्ति -

**जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।**

**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्याच्चैव।।**[9]

केचन दार्शनिकाः वदन्ति यद् जीवस्यानेकत्वं गुणाधीनमस्ति। गुणास्तत्र त्रयो विद्यन्ते- सत्त्वगुणः, रजोगुणः, तमोगुणश्चेति। तत्र सात्त्विकजीवाः मुक्ताः सन्ति, राजसिकजीवाः स्वर्गनर्कयोश्चके भ्रमन्ति तामसिकाश्च जीवाः सर्वदा तमसोपेतत्वात् बन्धने एव तिष्ठन्ति।[10] परञ्च दयानन्दो मतमिदं न स्वीकरोति। दयानन्दमते सर्वेषां मनुष्यखगपशुसर्पादीनां जीवात्मनः समाना एव सन्ति तत्र नास्ति कोऽपि भेदः ।[11]

**जीवात्मनो बन्धकारणम् -** भारतीयदर्शेषु प्रायः अज्ञानेन बन्धनं भवति ज्ञानेन च मोक्षो भवति । साङ्ख्ययोगदर्शनयोर्बुद्धेरष्टौ स्वरूपाः प्रतिपादिताः। तत्र धर्माऽधर्मज्ञानविरागरागैश्वर्यानैश्वर्यैर्बन्धनं भवति ज्ञानेन च मोक्षो भवति।[12] साङ्ख्ययोगयोर्मते बन्धनं प्रकृतेर्भवति । वैशेषिकन्यायदर्शनयोरपि कर्मफलत्वेन जीवात्मनो बन्धनं मोक्षो वा भवति। दयानन्दस्वामिनोऽपि कर्मफलत्वेनैव जीवात्मनो बन्धनं स्वीकुर्वन्ति। तेषां मते जीवात्मा स्वादृष्टकर्मफलानुसारमेव शरीरं धारयति । महोदयानां मते जीवात्मानः बन्धनं स्वभावतःन भवति हि जीवः स्वभावतो बद्धोऽस्ति चेत्तस्य मुक्तिर्न सम्भवति स्वभावतश्च मुक्तोऽस्ति चेत्तदा तस्य बन्धनं न भवितुमर्हति । अतः बन्धनं मोक्षो वा निमित्तेकारणेन भवति तन्निमित्तकारणं कर्मफलमेवास्ति ।[13]

साङ्ख्यदर्शनस्याधारग्रन्थे साङ्ख्यसूत्रे महर्षिकपिलेन एकस्मिन् सूत्रे कथितम् - शरीरादिव्यतिरिक्तः पुमान् ।[14] अत्र 'पुमान्' इत्यस्य पदस्यार्थोऽस्ति आत्मा। स आत्मा शरीरेन्द्रियबुद्ध्यादैर्व्यतिरिक्तः चेतनतत्त्वमस्ति । यस्य आत्मनः सिद्धिविषये महर्षिकपिलः कथयति- संहतपरार्थत्वात् ।[15] त्रिगुणादिविपर्ययात्।[16] अधिष्ठानाच्चेति ।[17] भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च।[18] अस्मिन्नेवक्रमे श्रीमदीश्वरकृष्ण-विरचितसाङ्ख्यकारिकायामपि पुरुषसिद्धिविषये कथितमस्ति -

**संहतपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।**
**पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ।।**[19]

स पुरुषः सर्वदा नित्यमुक्तोऽस्ति । तस्य कादापि बन्धमोक्षौ न जायेते। बन्धमोक्षौ तु वस्तुतः प्रकृतेर्भवतः । यथा सङ्ख्यदर्शने पुरुष एव आत्मा अस्ति तथैव योगदर्शनेऽपि स पुरुष एव आत्मा अस्ति । द्रष्टृदृश्ययोः संयोगः हेयहेतुः ।[20] अत्र द्रष्टा बुद्धेः प्रतिसंवेदी पुरुषः अस्ति। दृश्यश्च सत्त्वोपारूढाः सर्वे धर्माः सन्ति अर्थात् प्रकृतिः ।

यद्यपि योगदर्शने ईश्वरोऽपि अस्ति परञ्च स ईश्वरः सृष्टिकर्ता-धर्ता-हर्ता-नियन्ता च नास्ति, ईश्वरोऽपि कोऽपि पुरुषविशेष एवास्ति । तर्हि प्रश्नोत्पद्यते यत् ईश्वरस्य प्रयोजनं किम् ? वस्तुतः योगदर्शने मोक्षप्राप्तिर्यथाष्टाङ्गयोगचित्तवृत्तिनिरोधक्रियायोगैर्भवति तथैव ईश्व-रेणापि भवति । मुक्तिः कथं भवतीश्वरेण ? अस्मिन् सन्दर्भे महर्षि-पतञ्जलिकृतयोगसूत्रे कथितम्- ईश्वरप्राणिधानाद्वा ।[21] अर्थादीश्वरं प्रति स्वसमर्पणेनापि मुक्तिर्भवति । तदा क ईश्वर इत्युत्तरे कथितम् - क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ।[22] अर्थाद्यः अविद्यादि पञ्च क्लेशैः, शुभाशुभकर्मैः, तेषां शुभाशुभकर्मणां फलेन एवञ्च तद्फलवासनैर्परामृष्टो योऽस्ति सः पुरुषविशेष एव ईश्वरः ।

महर्षिकणादपादैर्वैशेषिकसूत्रे आत्मलक्षणं कथितमस्ति यत् **-** प्राण-अपान-निमेष-उन्मेष-जीवन-मनोगति- इन्द्रियान्तरविकाराःसुखदुःखे-च्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि॥[23] अर्थात् आत्मनो चाक्षुषप्रत्यक्षना भवति सूक्ष्मत्वात् । आत्मा द्रव्यमस्ति यतो हि कथितम् -क्रियागुणवत् समवायिकरणमिति द्रव्यलक्षणम् ।[24] सर्वेषां द्रव्याणां विशेषगुणाः सन्ति। यथा स्पर्शं वायौ, गन्धः पृथिव्यां, रूपं तेजसि, शब्दं आकाशस्य इत्यादि गुणाः सदैव गुणिनौ तिष्ठन्ति आश्रयत्वात् । गुणा एव गुणीनां लिङ्गानि भवन्ति । तथैव सुखदुःखेच्छाद्वेषप्रयत्नादिनां गुणानामाश्रयमस्ति आत्मा एव अन्यद्रव्याश्रयाभावात्। सुखादि आत्मनः लिङ्गानि सन्ति । अतः आत्मा नवमो द्रव्यमस्ति ।

स आत्मा नित्य अस्ति - तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते ।[25]तस्मात्-आगमिकः।[26] अहमिति प्रत्यगात्मनि भावात् परत्र अभावात् अर्थान्तर-प्रत्यक्षः।[27] वेदान्तदर्शने ब्रह्म एव नित्य तत्त्वमस्ति अन्य-त्सर्वमनित्यम्। नित्यपदस्यार्थोऽस्ति "त्रिकालसंसर्गाविच्छिन्नं नित्यम्।" अत्र जीव एव ब्रह्मस्ति - जीव एव ब्रह्म नापरः ।[28]

स्वामिदयानन्दस्य मते आत्मा अणुपरिमाणोऽस्ति । जैनदर्शनस्य आत्मविषये यो मध्यममतम् अर्थात् शरीरपरिणाममतमस्ति तस्य खण्डनं दयानन्दमहोदयः करोति। जैनमते हस्तिकाये आत्मनः आकारः हस्तिशरीरवत्, मानवशरीरे मानवशरीरवत् भवति। केषाञ्चन मते आत्मा विभुरस्ति । विभुपदेन आत्मनः सार्वभौमिकत्वं गृह्यते । परञ्च एक एव आत्मा सर्वशरीरेषु विद्यमानः स्यात् इत्यत्रापि कल्पनादोषो भवति । अतः स्वामिदयानन्दस्य मते आत्मा अणुपरिमाणोऽस्ति इति सिद्धम् ।

**सन्दर्भग्रन्थसूची -**


1. सत्यार्थप्रकाशः
2. तर्कभाषा
3. तर्कसङ्ग्रहः
4. साङ्ख्यसूत्रम्
5. साङ्ख्यकारिका
6. A History of Indian Philosophy.
7. योगसूत्रम्
8. वैशेषिकसूत्रम्
9. भारतीय दर्शन : आलोचन और अनुशीलन

**पाद टिप्पणी:**

1. सत्यार्थप्रकाशः, पृष्ठसङ्ख्या - 161
2. केशवमिश्रः, तर्कभाषा, पृष्ठसङ्ख्या - १८५
3. केशवमिश्रः, तर्कभाषा, पृष्ठसङ्ख्या - २५८
4. केशवमिश्रः, तर्कभाषा, पृष्ठसङ्ख्या - १८५
5. सत्यार्थप्रकाशः, पृष्ठसङ्ख्या - 166
6. अन्नम्भट्टः, तर्कसङ्ग्रहः,१७
7. सत्यार्थप्रकाशः, पृष्ठसङ्ख्या - 164
8. महर्षिकपिलः, साङ्ख्यसूत्रम्, १.१४९
9. श्रीमदीश्वरकृष्णः, साङ्ख्यकारिका, १८
10. A History of Indian Philosophy. Vol- IV, Page N. 155-156, S.N. Dass Gupta
11. सत्यार्थप्रकाशः, पृष्ठसङ्ख्या - 255
12. विपर्ययादिष्यते बन्धः ज्ञानेन चापवर्गः। साङ्ख्यकारिक, 31
13. सत्यार्थप्रकाशः, पृष्ठसङ्ख्या - 256
14. महर्षिकपिलः, साङ्ख्यसूत्रम्, १.१३९
15. महर्षिकपिलः, साङ्ख्यसूत्रम्, १.१४०
16. महर्षिकपिलः, साङ्ख्यसूत्रम्, १.१४२
17. महर्षिकपिलः, साङ्ख्यसूत्रम्, १.१४२
18. महर्षिकपिलः, साङ्ख्यसूत्रम्, १.१४३
19. श्रीमदीश्वरकृष्णः, साङ्ख्यकारिका, १४
20. महर्षिपतञ्जलिः, योगसूत्रम्, २.१७
21. महर्षिपतञ्जलिः, योगसूत्रम्, १.१३
22. महर्षिपतञ्जलिः, योगसूत्रम्, १.१४
23. महर्षिकणादः, वैशेषिकसूत्रम्, ३.२.४
24. महर्षिकणादः, वैशेषिकसूत्रम्, ३.२.१५
25. महर्षिकणादः, वैशेषिकसूत्रम्, ३.२.५
26. महर्षिकणादः, वैशेषिकसूत्रम्, ३.२.६
27. महर्षिकणादः, वैशेषिकसूत्रम्, ३.२.९
28. चन्द्रधरशर्मा, भारतीय दर्शन : आलोचन और अनुशीलन, पृष्ठसङ्ख्या - २६५